सत्यं शिवमानम्

WEST BENGAL STATE UNIVERSITY
B.A. Honours 6th Semester Examination, 2023

# SANACOR13T-SANSKRIT (CC13)

## ONTOLOGY AND EPISTEMOLOGY

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### SECTION-A
### (Marks: 10)

1. अधो लिखितेषु यथेच्छं ***पञ्चप्रश्नाः*** समाधेयाः। — 2×5 = 10

(क) भारतीयदर्शनसम्प्रदायेषु के तावत् आस्तिकाः भवन्ति?

(ख) आरम्भवाद इति नामकरणे किं कारणम्? आरम्भवादं के स्वीकुर्वन्ति?

(ग) भारतीयदर्शने द्वैतवादस्य कः आशयः? द्वैतवादस्य प्रतिष्ठाता कः आसीत्?

(घ) भारतीयदर्शने सत्कार्यवादं के अङ्गीकुर्वन्ति? सत्कार्यवादस्य कः आशयः?

(ङ) जैनमते रत्नत्रयं किम्?

(च) स्वभाववादस्य प्रवक्तारः के सन्ति? वादस्यास्य कः आशयः?

(छ) भारतीयदर्शने एकत्ववादस्य प्रवक्ता कः आसीत्? अस्य दर्शनस्य मुख्यो विषयः को वर्तते?

### SECTION-B
### (Marks: 20)

2. अधो लिखितेषु प्रश्नेषु ***यथेच्छमेकः*** प्रश्नः समाधेयः। — 10×1 = 10

(क) किं नाम सामान्यम्? तर्कसंग्रहानुसारेण सामान्यस्य लक्षणमालोच्यताम्। कथं सामान्यं पदार्थत्वेन स्वीक्रियते? — 2+5+3

(ख) को नाम अभावः? तस्य कति भेदाः? यथेच्छं भेदद्वयमाश्रित्य वैशद्येन आलोच्यताम्। — 2+2+6

(ग) तर्कसंग्रहनये कति गुणाः? गुणेषु यथेच्छं त्रयमाश्रित्य समासेन विचारः क्रियताम्। — 2+8

3. (क) अधो लिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत। — 5×2 = 10

आत्मा, मनः, विशेषः।

अथवा

(ख) अधो लिखितेषु यथेच्छं ***द्वयमाश्रित्य*** व्याख्यां लिखत। 5×2 = 10

(i) तत्र गन्धवती पृथिवी।

(ii) संयोगनाशको गुणो विभागः।

(iii) शब्दगुणकमाकाशम्।

## SECTION-C

### (Marks: 20)

4. अधो लिखितेषु ***यथेच्छमेकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) तर्कसंग्रहानुसारं कारणकरणयोः पार्थक्यं वैशद्येन लिखत। 10

(ख) अनुमितिकरणं किम् ? तस्य कस्तावद्व्यापारः ? स्वार्थानुमानपरार्थानुमानयोः पार्थक्यं वैशद्येन प्रदर्श्यताम्। 2+2+6

(ग) व्याप्तिस्वरूपं तर्कसंग्रहमाश्रित्य संक्षेपेण वर्णनीयम्। व्याप्तेः कति भेदाः ? 8+2

5. (क) अधो लिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत। 5×2 = 10

स्मृतिः, उपमितिः, प्रत्यक्षम्

अथवा

(ख) अधो लिखितेषु यथेच्छं ***द्वयमाश्रित्य*** व्याख्यां लिखत। 5×2 = 10

(i) आप्तवाक्यं शब्दः।

(ii) सन्दिग्धसाध्यवान् पक्षः।

(iii) कार्यं प्रागभावप्रतियोगि।

——×——